# झारखण्ड शैक्षिक अनुसन्धान एवं प्रशिक्षण परिषद्, राँची।
## वार्षिक परीक्षा 2023-24
## आदर्शप्रश्नपत्रम्
## संस्कृतम् (ऐच्छिकम्)

**कक्षा-द्वादशी** **विषयः - संस्कृतम्**

**समयः - 3:00** **पूर्णांकाः – 80**

सामान्यनिर्देशः :-

- अभ्यर्थिनः यथाशक्ति स्वशब्देषु उत्तरं दद्युः।
- कुलप्रश्नानां संख्या 52 अस्ति।
- प्रश्नः 1 तः 30 पर्यन्तं बहुविकल्पप्रश्नाः सन्ति, प्रत्येकं प्रश्ने चत्वारः विकल्पाः सन्ति। सम्यक् विकल्पं चिनोतु। प्रत्येकं प्रश्नस्य कृते एकं अंकं विनियोजितं भवति।
- प्रश्नसङ्ख्या 31 तः 38 पर्यन्तं अतीव लघु उत्तरप्रश्नाः सन्ति। येषु कस्यापि 6 प्रश्नस्य उत्तरं दातुं अनिवार्यम् अस्ति। प्रत्येकस्य प्रश्नस्य मूल्यं 2 अङ्केषु निर्धारितं भवति।
- प्रश्नसङ्ख्या 39 तः 46 पर्यन्तं लघुउत्तरप्रश्नाः सन्ति। येषु कस्यापि 6 प्रश्नस्य उत्तरं दातुं अनिवार्यम् अस्ति। प्रत्येकस्य प्रश्नस्य मूल्यं 3 अङ्केषु निर्धारितं भवति।
- प्रश्नसङ्ख्या 47 तः 52 पर्यन्तं दीर्घ उत्तरप्रश्नाः सन्ति। कस्यापि 4 प्रश्नस्य उत्तरं दातुं अनिवार्यम् अस्ति। प्रत्येकस्य प्रश्नस्य मूल्यं 5 अङ्केषु निर्धारितं भवति।

---

## अपठित-अवबोधनम्
## अधोलिखितं गद्यांशं पठित्वा विकल्पेभ्यः उचितमुत्तरं चिनुत।

भारते षड् ऋतवः सन्ति। तेषु वसन्तः ऋतुराजः कथ्यते। चैत्रे वैशाखे च मासे वसन्तः भवति। वसन्ते द्वौ प्रमुखौ उत्सवौ भवतः – वसन्तोत्सवः होलिकोत्सवः च। वसन्तोत्सवे सर्वत्र प्रमादो भवति। नराः नार्यश्च सर्वत्र गायन्ति नृत्यन्ति च। होलिकोत्सवः फाल्गुनमासस्य पूर्णिमायां भवति। हर्षातिरेकेण नराः, नार्यः, युवानः, वृद्धाः, बालकाश्च प्रसन्नाः भवन्ति। जनाः परस्परं रक्तवर्णं रक्तचूर्णञ्च प्रक्षिपन्ति। द्वेषं विस्मृत्य सर्वे परस्परं मिलन्ति।

**1. भारते कति ऋतवः सन्ति?**

क. पञ्च ख. षड् ग. सप्त घ. चत्वारः

**2. ऋतुराजः कः कथ्यते?**

क. वर्षा ख. हेमन्तः ग. वसन्तः घ. ग्रीष्मः

**3. होलिकोत्सवः कदा भवति?**

क. वर्षाकाले ख. फाल्गुनमासे ग. ज्येष्ठमासे घ. ग्रीष्मकाले

**4. कं विस्मृत्य सर्वे परस्परं मिलन्ति।**

क. क्रोधं ख. स्नेहं ग. हर्षं घ. द्वेषं

**5. 'विस्मृत्य' इति पदे कः प्रत्ययः?**

क. ल्यप्  ख. क्त्वा  ग. क्त  घ. तुमुन्

## पठित-अवबोधनम् - अनुप्रयुक्त-व्याकरणम्

**अधोलिखितं गद्यांशं पठित्वा विकल्पेभ्यः उचितमुत्तरं चिनुत।**

एकस्मिन् दिने श्रीनायारः पत्रमेकं धृत्वा मस्तकमवनमय्य पठन् आसीत्।नेत्रतीराद् विगलिता अश्रुधारा आर्द्रीकरोति स्म पत्रस्य अर्धाधिकं भागम्। तदानीमेव तस्य कार्यालयलिपिकः श्रीदासः प्रविशति। श्रीनायारः तमुक्तवान् – अधुना मम गमनसमयः समुपागत एव। मम दायित्वहस्तान्तरणपत्रकं सज्जीकुरु।

**6. एकस्मिन् दिने कः पत्रमेकं धृत्वा मस्तकमवनमय्य पठन् आसीत्?**

क. आचार्यः  ख. श्रीदासः  ग. श्रीनायारः  घ. लिपिकः

**7. पत्रस्य अर्धाधिकं भागं का आर्द्रीकरोति स्म?**

क. अश्रुधारा  ख. जलधारा  ग. अमृतधारा  घ. दुग्धधारा

**8. कार्यालयलिपिकस्य नाम किम् आसीत्?**

क. श्रीदासः  ख. श्रीनायारः  ग. हरीदासः  घ. लिपिकः

**अधोलिखितं पद्यांशं पठित्वा विकल्पेभ्यः उचितमुत्तरं चिनुत।**

**नियतं कुरु कर्म त्वं कर्म ज्यायो ह्यकर्मणः।**

**शरीरयात्रापि च ते न प्रसिद्ध्येदकर्मणः॥**

**9. 'नियतं कुरु कर्म त्वं'। अत्र 'त्वं' इति पदं कस्मै प्रयुक्तम्?**

क. कृष्णाय  ख. शरीराय  ग. अर्जुनाय  घ. भीमाय

**10. अकर्मणः किं ज्यायः?**

क. कर्म  ख. धर्मः  ग. युद्धः  घ. शरीरम्

**11. 'नियतं कुरु कर्म त्वं कर्म ज्यायो ह्यकर्मणः।' इति कः कथयति?**

क. अर्जुनः  ख. कृष्णः  ग. भीमः  घ. दुर्योधनः

**अधोलिखितं संवादं पठित्वा विकल्पेभ्यः उचितमुत्तरं चिनुत।**

**योगाचार्यः -** प्रियच्छात्राः किं भवन्तः जानन्ति यत् योगशास्त्रे शरीरस्य मनसः च नियमनं प्रतिपादितं वर्तते। अस्य ज्ञानेन अभ्यासेन च भवन्तः स्वाध्यायेऽपि एकाग्रतां वर्धयितुम् सक्षमाः भविष्यन्ति।
**मनीषः -** अस्माभिः समाचारपत्रेषु पठितम् यत् विश्वेऽपि योगदिवसः सोत्साहम् मान्यते।
**योगाचार्यः -** साधूक्तम्। जूनमासस्य एकविंशतितमः दिवसः तु अन्ताराष्ट्रिययोगदिवसरूपेण सर्वत्र मान्यते।
**मोहिनी -** आचार्य ! सम्प्रति वयं योगविषये सविस्तरं ज्ञातुम् इच्छामः।

**12. शरीरस्य मनसः च नियमनं कुत्र प्रतिपादितं वर्तते?**

क. योगशास्त्रे  ख. धर्मशास्त्रे  ग. समाचारपत्रे  घ. अर्थशास्त्रे

**13. योगदिवसः कस्मिन् मासे मान्यते?**

क. जून  ख. जुलाई  ग. अगस्त  घ. जनवरी

**14. छात्राः कस्मिन् विषये ज्ञातुम् इच्छन्ति?**

सङ्गीतविषये ख. योगदिवसे ग. योगविषये घ. धर्मशास्त्रे

**उचितविकल्पेन रिक्तस्थानानि पूरयत।**

**15. ------- परितः वृक्षाः सन्ति।**

क. गृहस्य ख. गृहेन ग. गृहानि घ. गृहं

**16. ------- संस्कृतं रोचते।**

क. मम ख. मया ग. मह्यं घ. अहम्

**17. 'माता च पिता च' अस्य समासिकपदं किम्?**

क. पितरौ ख. मातरौ ग. माता-पिता घ. मातृपितरौ

**18. सोऽवदत् = ---- + ----**

क. सा + वदत् ख. स + अवदत् ग. सो + वदत् घ. सः + अवदत्

**19. स्वकार्यं त्यक्त्वा अपरस्य सहकारस्तस्य परमधर्मः। अत्र 'त्यक्त्वा' इति पदे प्रत्ययः?**

क. क्त ख. क्त्वा ग. तव्यत् घ. अनीयर्

**20. कृ + तुमुन् = -----**

क. कर्तुम् ख. करोतु ग. कृत्वा घ. करणीयः

## रचनात्मक-कार्यम् - संस्कृत-साहित्येतिहास-परिचयः

**उत्तरार्थम् उचितविकल्पं चिनुत।**

**21. गद्यपद्यमिश्रितं काव्यं कीदृशं काव्यं कथ्यते?**

क. गद्यकाव्यं ख. महाकाव्यं ग. चम्पूकाव्यं घ. गीतिकाव्यं

**22. आदिकाव्यं कः कथ्यते?**

क. मेघदूतं ख. महाभारतं ग. रामायणं घ. हर्षचरितं

**23. नाटकं कीदृशं काव्यं अस्ति?**

क. दृश्यकाव्यं ख. श्रव्यकाव्यं ग. खण्डकाव्यं घ. महाकाव्यं

**24. कः बाणभट्टस्य रचना अस्ति?**

क. मेघदूतं ख. हर्षचरितं ग. पञ्चतन्त्रं घ. हितोपदेशं

**25. कति वेदाः?**

क. त्रयः ख. पञ्च ग. चत्वारः घ. शड्

**26. रामायणस्य लेखकः कः?**

क. वेदव्यासः ख. विष्णुशर्मा ग. वाल्मीकिः घ. श्रीहर्षः

**27. हितोपदेशः कस्य रचना अस्ति?**

क. नारायणपण्डितस्य ख. वेदव्यासस्य ग. श्रीहर्षस्य घ. दाराशिकोहस्य

**28. प्रधानाचार्यं प्रति लिखितं पत्रं कीदृशं पत्रं भवति?**

क. संदेशं ख. अनौपचारिकं ग. औपचारिकं घ. संवादं

**29. नाटकस्य अन्तः केन भवति ?**

क. भरतवाक्येन ख. सरलवाक्येन ग. कठिनवाक्येन घ. भाषणेन

**30. छन्दरहितं काव्यं --------- कथ्यते।**

क. पद्यकाव्यं ख. गद्यकाव्यं ग. चम्पूकाव्यं घ. महाकाव्यं

**अपठितांश /अवबोधनम्-पठितांशअवबोधनम्-**

**(अङ्कीयाः प्रश्नाः 2)**

**निर्देशः- अस्मिन् खण्डे अष्टप्रश्नाः सन्ति। केवलं षट्प्रश्नानाम् उत्तराणि लिखन्तु।**

**अधोदत्तं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि निर्देशानुसारेण लिखन्तु।**

भूमिः। अत्र अस्माकं पूर्वजाः ऋषयः मुनयः च विश्वं कुटुम्बवत् पश्यन्ति स्म। ऋषिः :भारतं शान्तेव्यासः अपि अकथयत्' -परोपकारः पुण्याय, पापाय परपीडनम्' इति। एतद् वाक्यद्वयमेव सर्वेषां धर्मग्रन्थानां सारः। उपनिषत्सु अपि वर्णितम्यः मानवः सर्वान् आत्मवत् पश्यति - सः एव वस्तुतः पश्यति। इदानीं केचन शिक्षिताः अपि मार्गभ्रष्टाभूत्वा : समाजविरोधिकार्याणि कुर्वन्ति इति खेदस्य विषयः। अतः शिक्षायां नैतिकमूल्यानां विकासाय अधिकाधिकः प्रयत्नः करणीयः। येन विद्या संस्कारं दद्यात्, विनयं वर्धयेत्, शीलं च विकासयेत्।

31**. पूर्णवाक्येन उत्तरत।**

शिक्षायां केषां विकासाय प्रयत्नः करणीयः .क?

ख. विद्या कं वर्धयेत्?

**32.निर्देशानुसारेण उत्तरत।**

क. इति क्रियापदस्य कर्तृपदं किम् 'अकथयत्'?

ख. विकासाय'' इति पदे का विभक्तिः?

ग. ':अशिक्षिता' इति पदस्य विलोमपदम् अत्र किं प्रयुक्तम्?

घ. 'ऋषिः व्यासः अपि अकथयत्?अत्र अव्ययपदं किम् '

**अधोदत्तं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि निर्देशानुसारेण लिखन्तु।**

भवादृशा एव भवन्ति भाजनान्युपदेशानाम्। अपगतमले हि मनसि विशन्ति सुखेनोपदेशगुणाः। हरति अतिमलिनमपि दोषजातं गुरूपदेशः। गुरूपदेशश्च नाम अखिलमलप्रक्षालनक्षमम् अजलं स्नानम्। विशेषेण तु राज्ञाम्। विरला हि तेषामुपदेष्टारः । राजवचनमनुगच्छति जनो भयात्। उपदिश्यमानमपि ते शृण्वन्ति। अवधीरयन्तः खेदयन्ति हितोपदेशदायिनो गुरून्।

**.33.पूर्णवाक्येन उत्तरत।**

कगुरुपदेशः कीदृशं दोषजातं हरति .?
खअजलं स्नानं किम् .?

. 34.**निर्देशानुसारेण उत्तरत।**

कउपदिश्य' .' इति पदे कः प्रत्ययः?
ख' .अवधीरयन्तःइति पदे कः उपसर्गः '?
गअजलं स्नानं' .' अत्र विशेषण पदं किम्?
घ' .हरति' इति क्रियापदस्य कर्तृपदं किम्?

**अधोदत्तं पद्यांशं पठित्वा प्रश्नानाम् उत्तराणि निर्देशानुसारेण लिखन्तु।**

**पापान्निवारयति योजयते हिताय,**
**गुह्यं निगूहति गुणान् प्रकटीकरोति।**
**आपद्गतं च न जहाति ददाति काले,**
**सन्मित्रलक्षणमिदं प्रवदन्ति सन्तः॥**

**35. पूर्णवाक्येन उत्तरत।**

क?पापात् कः निवारयति .
खसन्मित्रं कान् प्रकटीकरोति .?

**36. निर्देशानुसारेण उत्तरत।**

क' .हिताय' इति पदे का विभक्तिः?
ख?इति पदस्य पर्यायपदम् अत्र किं प्रयुक्तम् 'आच्छादयति' .
ग' .प्रवदन्ति' इति पदे कः उपसर्गः?
घ' .प्रकटीकरोति' इति क्रियापदस्य कर्तृपदं किम्?

**अधोदत्तं नाट्यांशं पठित्वा प्रश्नानाम् उत्तराणि निर्देशानुसारेण लिखन्तु।**

**कौसल्या अहो (उत्सङ्गे गृहीत्वा) इतोऽपि तावदेहि। !जात :, न केवलं**
**मांसलोज्ज्वलेन देहबन्धेन, कलहंसघोषघर्घरानुनादिना स्वरेण-**
**-चिबुक) पश्यामि ते मुखपुण्डरीकम्। !च रामभद्रमनुसरति। जात**
**मुन्नमय्य , निरूप्य, सवाष्याकूतम्राजर्षे किं न पश्यसि (? निपुणं**
**निरूप्यमाणो वत्साया मे वध्वा मुखचन्द्रेणापि संवदत्येव।**

**37. पूर्णवाक्येन उत्तरत।**

क .लवः रामभद्रं कथमनुसरति?
ख निपुणं .निरूप्यमाणो वत्साया मे वध्वा मुखचन्द्रेणापि संवदत्येव। अत्र मे'' इति पदं कस्यै प्रयुक्तम्?

**38. 'गृहीत्वा' इति पदे कः प्रत्ययः?**

**पठितांशव्याकरणम्-अनुप्रयुक्त - अवबोधनम्-**
**(3 अङ्कीयाः प्रश्नाः(**

**निर्देशः- अस्मिन् खण्डे अष्टप्रश्नाः सन्ति। केवलं षट्प्रश्नानाम् उत्तराणि लिखन्तु।**

**39. अधोलिखितश्लोकस्य अन्वयं पूर्णं कुरुत।**

**अनेजदेकं मनसो जवीयो नैनद्देवा आप्नुवन्पूर्वमर्षत्।**
**तद्धावतोऽन्यानत्येति तिष्ठत्तस्मिन्नपो मातरिश्वा दधाति॥**

**अन्वयः-** तत् --- एनत् न आप्नुवन् यस्मात् पूर्वं अर्षत्। तत् तिष्ठत् धावतः ----- ।:अनेजत् मनसः जवीय ----- अत्येति। तस्मिन् सति मातरिश्वा अपः दधाति। ----

**40 . रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत।**

क. एकैकस्य शब्दस्य बहवः <u>अपभ्रंशाः</u> सन्ति।
ख. <u>शब्दानां</u> प्रतिपत्तौ प्रतिपदपाठः कर्तव्यः।
ग. <u>बृहस्पतिः</u> इन्द्राय प्रतिपदशब्दान् उक्तवान्।

41. **श्लोकांशमेलनं कुरुत।**

क दातव्यं भोक्तव्यं धनविषये . नीरं नीरजराजितम्।-

खअस्ति यद्यपि सर्वत्र . उभे सुकृतदुष्कृते। गबुद्धियुक्तो जहातीह.

सञ्चयो न कर्तव्यः।

**42.कोष्ठकेषु प्रदत्तपदेषु उचितविभक्तिं प्रयुज्य रिक्तस्थानानि पूरयत।**

क. ------- पत्राणि पतन्ति। (वृक्ष)

ख. ------ कालिदासः श्रेष्ठः। (कवि)

ग. श्री ------- नमः। (गणेश)

**43.वाक्यनिर्माणं कुरुत।**

क. अहम्

ख. विद्या

ग. शिक्षकः

**44. विलोमपदानि लिखत।**

क. बुद्धिहीनः

ख. दुष्कृतम्

ग. अकौशलम्

**45. सन्धिं/विच्छेदं कुरुत।**

क. कोऽयम्

ख. इतः + ततः

ग. निः + उपाय

**46. अधोलिखित-विग्रहपदानां समस्तपदानि रचयत।**

**यथा- कुलस्य व्रतम् – कुलव्रतम्**

क. वनस्य अन्तरे - ---------
ख. गुणानां लब्धाः - ---------
ग. प्रकृत्या सिद्धम् - --------

**रचनात्मकःपरिचय-साहित्येतिहास-संस्कृत - कार्यम्-(5 अङ्कीयाः प्रश्नाः)**

**निर्देशः- अस्मिन् खण्डे षट्प्रश्नाः सन्ति। केवलं चतुर्णां प्रश्नानाम् उत्तराणि लिखन्तु।**

**47 अधोदत्तचित्रं दृष्ट्वा मञ्जूषासहायतया पञ्च वाक्यानि लिखत।**

(मञ्जूषा- उपवनम्, वृद्धः, पादपाः, वृक्षाः, पुष्पाणि, बालः, बाला, कन्दुकः, महिला)



**48. दिनद्वयस्य अवकाशार्थं प्रधानाचार्यं प्रति एकं प्रार्थनापत्रं लिखत।**

**49. मञ्जूषातः उचितवाक्यानि गृहीत्वा अधोलिखितं संवादं पूरयत।**

(मञ्जूषा – संस्कृतं, के लाभाः, पठसि, बहवः, पठामि)

श्यामः  किं त्वं !मित्र –संस्कृतं ---------(क)?

करीम--------(ख) अहं संस्कृतं !आम् - :।

श्यामः -------(ग) संस्कृतपठनेन –?

करीमलाभाः सन्ति -------(घ) संस्कृतपठनेन - :।

श्यामः पठामि --------(ङ) अहम् अपि –।

**50. गद्यकाव्यस्य अथवा पद्यकाव्यस्य वैशिष्ट्यं पञ्चवाक्येषु प्रतिपादयत।**

**51. संस्कृते अनुवादं कुर्वन्तु। (केवलं पञ्चानाम्)**

क. मुझे संस्कृत अच्छा लगता है।

ख. परिश्रम के बिना धन नहीं आता।

ग. सीता राम के साथ वन गई।

घ. वह प्रतिदिन विद्यालय जाता है।

ङ. हमलोग भारत में रहते हैं।

च. सभी सुखी हों।

छ. श्री गणेश को नमस्कार है।

**52. अधोलिखितरचनानां लेखकानां नामानि लिखत। (केवलं पञ्चानाम्)**

क. रामायणम्

ख. शिवराजविजयम्

ग. रघुवंशम्

घ. महाभाष्यम्

ङ. योगसूत्रम्

च. हर्षचरितम्

छ. पञ्चतन्त्रम्

नवोन्मेष शोध नेतृत्व
JCERT

# उत्तराणि

**1.** ख. षड्

**2.** ग. वसन्तः

**3.** ख. फाल्गुनमासे
**4.** घ. द्वेषं
**5.** क. ल्यप्
**6.** ग. श्रीनायारः
**7.** क. अश्रुधारा
**8.** क. श्रीदासः
**9.** ग. अर्जुनाय
**10.** क. कर्म
**11.** ख. कृष्णः
**12.** क. योगशास्त्रे
**13.** क. जून
**14.** ग. योगविषये
**15.** घ. गृहं
**16.** ग. मह्यं
**17.** क. पितरौ
**18.** घ. सः + अवदत्
**19.** ख. क्त्वा
**20.** क. कर्तुम्
**21.** ग. चम्पूकाव्यं
**22.** ग. रामायणं
**23.** क. दृश्यकाव्यं
**24.** ख. हर्षचरितं
**25.** ग. चत्वारः
**26.** ग. वाल्मीकिः
**27.** क. नारायणपण्डितस्य
**28.** ग. औपचारिकं
**29.** क. भरतवाक्येन
**30.** ख. गद्यकाव्यं